प्रवेश सं० १६०१९

विषय: धर्मशास्त्रम्

क्रम सं०

नाम मांसभक्षणवर्जनविचारः (अपूर्णम्?)

ग्रन्थकार

पत्र सं० १

श्लोक सं०

अक्षर सं० (पंक्तौ) २२

पंक्ति सं० (पृष्ठे) १०

आकार: ९.१x४

लिपि: दे.ना.

आधार: कागज़

वि० विवरणम् अपू.

13913

न. १६३२

पी० एस० यू० पा०—७७ एम० सी० ई०—१९४१—५० ०००

Indira Gandhi National Centre for the Arts

४ ४

नः अवक्ष्यामि विधिं भक्षणवर्जने ॥२६॥ प्रो॥क्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया ॥ यथाविधि
नियुक्तस्तु प्राणानामेव चात्यये ॥२७॥ प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयेत्॥ स्थावरं
जंगमं चैव सर्वं प्राणस्य भोजनं ॥२८॥ चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः ॥ अहस्ताश्च
सहस्तानां शूराणां चैव भीरवः ॥२९॥ मधुपर्के च यज्ञे च पितृदैवतकर्मणि ॥ अत्रैव पशवो हिं
स्या नान्यत्रेत्यब्रवीन्मनुः ॥२८॥ नात्ता दुष्यत्यदन्नाद्यान् प्राणिनो ऽहन्यहन्यपि ॥ धात्रैव सृष्टा ह्याद्या
श्च प्राणिनो नार एव च ॥३०॥ यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ॥ अतो ऽन्यथा
प्रवृत्तिस्तु राक्षसो विधिरुच्यते ॥३१॥ क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा ॥ देवान् पितॄंश्चा
र्चयित्वा खादन्मांसं न दुष्यति ॥३२॥ नाद्यादविधिना मांसं विधिज्ञो ऽनापदि द्विजः ॥ जग्ध्वा ह्य
विधिना मांसं प्रेत्य तैरद्यते ऽवशः ॥३३॥ न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः ॥ यादृशं भवति
प्रेत्य वृथा मांसानि खादतः ॥३४॥ नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ॥ स प्रेत्य पशुतां

६

म० ५ यानि संभवानेकविंशतिं ॥३५॥ असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रः कदाचन ॥ मन्त्रैस्तु संस्कृतानद्या
च्छाश्वतं विधिमास्थितः ॥३६॥ कुर्याद्घृतपशुं संगे कुर्यात्पिष्टपशुं तथा ॥ न त्वेव तु वृथा हन्तु
पशुमिच्छेत्कदाचन ॥३७॥ यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणं ॥ वृथापशुघ्नः प्राप्नोति
प्रेत्य जन्मनि जन्मनि ॥३८॥ यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ॥ यज्ञस्य भूत्यै सर्वस्य तस्मा
द्यज्ञे वधोऽवधः ॥३९॥ ओषध्यः पशवो वृक्षास्तिर्यंचः पक्षिणस्तथा ॥ यज्ञार्थं निधनं प्राप्ताः
प्राप्नुवन्त्युत्सृतीः पुनः ॥४०॥ मधुपर्के च यज्ञे च पितृदैवतकर्मणि ॥ अत्रैव पशवो हिंस्या
नान्यत्रेत्यब्रवीन्मनुः ॥४१॥ एष्वर्थेषु पशून्हिंसन्वेदतत्त्वार्थविद्द्विजः ॥ आत्मानं च पशुं चै
व गमयत्युत्तमां गतिं ॥४२॥ गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः ॥ नावेदविहितां हिंसा
मापद्यपि समाचरेत् ॥४३॥ या वेदविहिता हिंसा नियतास्मिंश्चराचरे ॥ अहिंसामेव तां वि राम
द्याद्वेदाद्धर्मो हि निर्बभौ ॥४४॥ योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया ॥ स जीवंश्च २

Indira Gandhi National Centre for the Arts